# VIVEKANANDA COLLEGE
# THAKURPUKUR
# KOLKATA-700063

NAAC ACCREDITED ‘A’ GRADE

Topic: Sanskrit studies in east

Course Title: Survey of the Modern Sanskrit literature

Paper: CC9

Unit: 2

Semester: 4th

Name of the Teacher: Abhishek Das

Name of the Department: Sanskrit

Name- P.K.NARAYANA PILLAI / PUTTILLATTU KRISHNA NARAYANA PILLAI
Birth date /Month/Year - 25/12/1910
Birth place - Tiruvalla,the cultural capital of Travancore Father - T Godavarma
Mother- Lakshmi Amma Spouse - J.Kamalamma Children -three daughters
K.Jayasree, K.Majusree,K.Rajasree
Qualification - Graduation and Post graduation completed from University of Madras, completed M.A. in Sanskrit in 1934 and Malayalam in 1936 with first class first rank. Awarded Ph.D. in Sanskrit from University of Bombay in the field of Vedic Studies in 1944.
contributed a lot to the study of Sanskrit,Malayalam and English Literature.
devotee of Vivekananda and Ramakrishna Paramahamsa.
He was a renowned Indian linguist, poet and philosopher.

Teaching experiences
1.Curator of university manuscripts at Kerala University from 1948-52
2.Professor of Sanskrit at University college from 1952-57.
3.Professor and HOD of Oriental studies from 1963-70.
4.Dean of the faculty of Oriental Studies, Kerala University from in 1957.

Non academic position
1.Executive member of the All Kerala Library Association,Kerala from 1960-72
2.Founder President of the Sree Sankaracharya Sanskrit Academy in 1974
3.Founder President and Honourable Director of the Ulloor Memorial Library and Research institute in 1956.

Awards and Honours
1.Sahitya Academy Award in Sanskrit for his epic poem Visvabhanu by Indira Gandhi.
2.Sree Godavari prize from Madras University
3.Vivekananda Award for his literary criticism from Kerala Sahitya Academy Award.
4.The National award for Sanskrit in 1982
5.President's award for Eminent Sanskrit scholars in 1985. Died at the age of 80 on 20th March,1990.

Literary contributions
1.Kanyakumarim Bhaje(1974)
2.Cidatmika stavah(1950)
3.Dharmastrstavah(1974)4. Dharmasagarah mahakavyam(1988)

5. Mayuradutam(1984)
6. Vimalananda-saptakam(1974)
7. Vivekananda stotram(1986)
8. Visvabhanuh(1988)
9. Bhaja-Ramakrishnam(1981)
10. Sabari-giri-kirtanam(1975)
11. Sri-vallabha-suprabhatam(1974)

SHANKARDEV AVATARE

Eminent Sanskrit scholar in twentieth century

Birth Date-15/04/1921

Birth place -Karaina village in Bulland town in UP Father - Shri Saligram

Academic Career

He was awarded the degrees - Prathama(1939) Madhyama(1942) Shastri(1945)

1. Acharya(1948) in Sanskrit from Kings College,Varanasi.
2. M.A. in Hindi from B.H.U
3. Ph.D. from same University in 1960
4. D.Lit from Agra University in 1970

Professional Career

He had a teaching career of twenty years

He was a professor of Hindi in the evening section at Motilal Neheru Mahavidyalaya under Delhi University

Adhaksya in Kashi Sanskrit Parishat from 1957 to 60.

Literary Contributions

He published 20 books including Nari-gitam Jivan-Muktakam Sita-ramiyam Shikharini Satakam etc.

Awards

1. President's award in1989
2. Uttar Pradesh Sanskrit Academy Award for Nari-gitam

REWA PRASAD DWIVEDI

Familiar as 'Sanatana kavi'

Born on 1935

Birth Place - Village Nadner, District- Sihore (M.P.)
He started learning from his father in his childhood.
Completing school education in Nadner came to Kashi in 1950 to obtain higher education under late Pt. Mahadev Shastri.He obtained the degree like -
Shastri(Sahitya,1953), Acharya(Sahitya,1956)
M.A. (Sanskrit Literature,1959 from B.H.U)
Ph.D. from Ravishankar University in 1966.He
was honoured with D.Lit in Sanskrit from Rani Durgabati Visvavidyalaya, Jabbalpur in 1974.

He started his academic career as Assistant Professor of Sanskrit under Government of Madhya Pradesh from 1959-70.He has worked in different posts. Such as -
*Reader in Sanskrit
*Faculty of Sanskrit *Learning and Theology at BHU from 1970-77.
*Professor (1977-95)
*Head of the Sahitya Department from 1970-90
*Dean at BHU in 1979-81
Emeritus Fellow UGC during 1991-92
*Life time Emeritus fellow professor in Sanskrit since 1993.etc.
Dwivedi has introduced new theories in the field of Sanskrit Poetics and Dramaturgy.New theories are-
1.Alamkara is the true soul of poetry
2.Dhvani has no historical and logical base and is not acceptable at all.
3. Reshaped the history of Sanskrit Poetics(2005)

Literary contributions
3 epics, 21lyrics, 2 dramas, several poems in Sanskrit.12000 Sanskrit verses in various metres many other poems like Brahmastram on the occasion of 50th year of India's Independence in 1999.
Prof. Dwivedi has edited for the first time complete text of Kalidasa - literature on the basis of 300 manuscripts including those preserved in Harvard University and critical editions published from all over the world under the title of 'Kalidasa-granthavali'.

Awards
1. 'The certificate of Honour' (President Award )on 15th August,1978.It was his lifetime achievement award at the age of just 42.
2. Sahitya Akademi Award in 1991.

3. Kalpavalli Puraskara from Bharatiya Bhasa Parisad, Calcutta in 1993.
4. Vacaspati Puraskara by K.K.Birla Foundation,New Delhi in 1997.
6. Valmiki Puraskara from U.P. Sanskrit Samsthan in 2004.

RAM KARAN SHARMA
Born on 20th March,1927
Birthplace - Shivapur in Saran district in Bihar.

Academic Qualification
He completed M.A.(Sanskrit and Hindi both)
from Patna University. Received fullbright scholarship in Sanskrit and engaged himself in research work in abroad. Obtained Ph.D degree from University of California. He is a renowned Sanskrit scholar as well as a poet. Apart from he was a government servant under Bihar Civil Service, Government of Bihar . He has got some degrees like Sahityacarya, Vedanta Sastri and Navya Vyakarana Sastri from Bihar Sanskrit Association.
Now He is the resident of Delhi and has been teaching in USA for several months of every year. Being an esteemed international scholar
He has been visiting professor at Columbia,Chicago and the University of California.
He is efficient in both Sanskrit and English. His literary volumes including poetry collection like Sandhya, Patheyasatakam, Vina and Kavita and the novels Rayisah and Sima.
He edited and translated some books on Indian medicine, epicsand the puranas and published about one hundred research papers in various seminars and journals. He has received many awards including the Sahitya Akademi Award in 1989, the Bharatiya Bhasha Parishad Award in 1989 and the Presidential Award. He received the krishna Kanta Handique Memorial Award in 2006. He is a fellow of the Royal Asiatic Society (London) and the member of the American Oriental Society.

ক্ষিতীশচন্দ্রচট্টোপাধ্যায়ঃ

গিরিবালা-শরচ্চন্দ্রয়োঃ পুত্রঃ ক্ষিতীশচন্দ্রচট্টোপাধ্যায়ঃ ১৮৯৬ঈসবীয়সংবত্সরে নভেম্বরমাসস্য চতুর্বিংশতিদিনাঙ্কে কলিকাতায়াং জোড়াসাঙ্কো ইতি স্থানে জাতঃ।১৯১৮ঈসবীয়সংবত্সরে কলিকাতাবিশ্ববিদ্যালয়াত্ স্নাতকোত্তরপদবীং প্রাপ্য্য সংস্কৃতব্যাকরণে প্রকৃষ্টাধ্যয়নার্থং ডি.লিট্ উপাধিমপি অবাপ।কানিচন দিনানি দক্ষিণসুবর্বনকলেজে(অধুনা আশুতোষকলেজ) শিক্ষাদানমকরোত্।অনন্তর কলিকাতাবিশ্ববিদ্যালয়ে অধ্যাপকরূপেণ নিযুক্তস্তত্রৈব পঞ্চত্রিংশত্ বর্ষাণি অসেবত।ভাষাবিঞ্জানে ব্যাকরণে চাস্য অগাধপাণ্ডিত্যমাসীত্। অস্য প্রসিদ্ধা গ্রন্থাঃ সন্তি-ষষ্টিতন্ত্রম্, Technical Terms and Technique of Sanskrit  Grammar,Greek Proverbs, Popular Etymology।সম্পাদিতগ্রন্থাঃ সন্তি-Patanjali's Mahabhasya,Vedic Selection।

মূলশঙ্করযাজ্ঞিকঃ

গুজরাটপ্রদেশস্য আধুনিকসংস্কৃতসাহিত্যানুশীলনে মূলশঙ্করযাজ্ঞিকস্য অবদানমাসীদ্ অনস্বীকার্যম্। তস্য সারস্বতকৃতয়স্তাবদ্ ছত্রোপতিসাম্রাজ্যম্, সংযোগিতাস্বয়ংবরম্, প্রতাপবিজয়মিতি।ছত্রোপতিসাম্রাজ্যম্-দশাঙ্কবিশিষ্টে অস্মিন্ নাটকে শিবাজীরাজস্য শাসনকালস্যঐতিহাসিকবৃত্তানি বর্ণিতানি। সংযোগিতাস্বয়ংবরম্-সপ্তাঙ্কসমন্বিতে অস্মিন্ নাটকে পৃথ্বীরাজচৌহানস্য জীবনালেখ্যম্ বর্ণিতম্।তস্য রাজত্বকালস্য নানাবিধানি  ঐতিহাসিকবৃত্তানি ক[illegible] অত্র সমুপস্থিতানি। প্রতাপবিজয়ম্-রাজপুতনরেশস্য রাণাপ্রতাপস্য বিজয়গাথা অত্র বর্ণিতা।

# उपसंहारः

प्राचीनभारतीयकाव्यपरम्परायामासन् भास-अश्वघोष-कालिदास-भवभूति-शूद्रक-श्रीहर्षादयो **काव्यकारा** नाट्यकाराश्च अग्रगण्याः। वस्तुतः संस्कृतकाव्यपरम्पराया धारा कदाचिदपि नासीदवरुद्धा। नाटकमतिरिच्य व्यायोग-भाण-प्रकरण-प्रहसनश्रेणीयानां **रू**पकानां समलक्षि निरवच्छिन्नः प्रवाहः। अपरतः श्रव्यकाव्यं केवलं श्रवणयोग्यम्। तथाहि विश्वनाथेन समवादि --- 'श्रव्यं श्रोतव्यमात्रं तत् पद्यगद्यमयं द्विधा'। इति। दृश्यकाव्यवच्छ्रव्यकाव्यस्यापि नैके विभागा आकर्षन्त्यस्मद्दृष्टिम्। तेषु महाकाव्य-खण्डकाव्य-गीतिकाव्य-गद्य-चम्पूकाव्यानामपि नो नयनयोरापतति परम्परैका। श्रेण्यामस्यां कालिदास-भारवि-माघ-श्रीहर्ष-दण्डि-वाणादिकवयो राराज्यन्ते। सर्व एते महाकवयः अलंकारशास्त्रोक्तनियमानाश्रित्य पारम्परिकतया काव्यानि विरचयामासुः। परं साम्प्रतिके काले ये खलु कवयः काव्यानि कुर्वन्ति, ते न केवलं परम्परावाहिकाव्यानि, चापि वैदेशिकप्रादेशिकसाहित्यैः समं गहनपरिचयवशात्तेभ्य उपादानानि समाकल्य नूतनाङ्गिकेन काव्यानि ग्रथयन्ति। तथाहि, आधुनिककवीनां लेखनीतो निर्गतानि निर्गच्छन्ति च महाकाव्य-दृश्यकाव्यादिप्राचीनसाहित्यधारामतिरिच्य कोषकाव्य-संस्तवकाव्यमुक्तकोपकथा-चरितकथाद्यवान्तरभेदैः शतशो रूचिराणि रूपाणि, प्रतीक-नभ-पथैकाङ्कात्मकरूपकानि च दृष्ट्वा श्रुत्वा पठित्वा वा भृशं ह्लादयन्ति सहृदयहृदयानि।

**वस्तुगतं परिवर्तनम्**

साहित्यकारैस्तत्कालीनपरिस्थितीनां चित्रणे स्वतः प्रवृत्तो भवति। तथाहि, आतङ्कवाद-यौतुक-भ्रूणहत्या-बालिकानिर्यातनादिसमस्याजातमाश्रित्य नाटकानि विरचितानि

इदानीन्तननाट्यकारैः। निम्नोपेक्षितचरित्राणां प्राधान्यं संलक्ष्यतेऽधुना। किञ्च, रामायण-महाभारत-पुराणादीनां विषया नाट्यवस्तुत्वेनोपस्थापिता नूतनाङ्गिकेन।

श्रीजीवस्य यौतुकसमस्याधारितं 'विधिविपर्यासम्', लिङ्गपरिवर्तनमुपरि श्रीजीवेन लिखितं 'पुरुषरमणीयम्', अम्बिकादत्तव्यासस्य 'सामव्रतम्', गजाननबालकृष्णपलसुलेपादस्य राष्ट्रीयैकतामाधारीकृत्य 'समानमस्तु वो मनः', शरणार्थिणां वास्तवोचितं नग्नचित्रमुपजीव्य 'शरणार्थिसंवादः', भारतस्य स्वाधीनतासंग्राममाधारीकृत्य हरिदासस्य नाटकत्रयं वङ्गीयप्रताप-मिवारप्रताप-शिवाजीचरिताख्यञ्चेति सर्वाण्यद्यतनकालीनसमस्याकवलितानि वर्तन्ते। परीक्षितदीक्षितस्य 'पानशाला', 'प्रेमपरीक्षा', 'अपराजितम्', 'न स्त्री स्वातन्त्रमर्हति' चेत्यादिषु नाटकेष्वत्याधुनिकं रूपं द्रुष्टुं शक्यम्। राधावल्लभत्रिपाठिनः प्रक्षणकसप्तकस्य प्रेक्षणकेषु नैकाः सामाजिकविसङ्गतयश्चित्रिताः। तत्र 'सोमप्रभ' इत्यत्र वधूदहनं, 'मेघसन्देशे' पर्यावरणं, 'मुक्त'नामके नाटके नायकनिष्ठगृहस्थधर्मपालनार्थमादर्शः, 'मशकधान्यां' राजनैतिकस्वार्थपरत्वं, गणेशपूजनमित्यत्र धार्मिकोत्सवं प्रति साधारणानामनास्था, 'प्रतीक्षायां' मध्यवर्गस्य पितुर्व्यथा चेति समस्याजातमङ्कितं वर्तते। प्रेक्षणसप्तकस्य भरतवाक्यमप्युल्लेख्यार्हं नाट्यकर्तुस्तत्र पर्यावरणचेतनाया उल्लेखात्। त्रिपाठिनः 'तण्डुलप्रस्थीयमिति' नाटके कस्यचिद्बालकस्य जीवनसंघर्षस्तथा च निम्नवर्गीयनायकस्यान्तःबाह्यजगतः प्रतिच्छाया रूपायितौ वर्तेते। राजेन्द्रमिश्रस्य केषुचिद्रूपकेषु सामाजिकमनोबैज्ञानिकसमस्याश्चित्रिताः। 'रूपरूद्रीयम्', 'चतुष्पथीयम्', 'नाट्यपञ्चगवम्', 'अकिञ्चनकाञ्चनञ्चे'ति तस्य एकाङ्किनाटकानि।

**भाषागतं विवर्तनम्**

आधुनिकसंस्कृतनाट्यकारैः ओजःसमासबहुलभाषाः परिवर्त्य सरलाः सुबोध्याः प्रादेशिकभाषाश्च प्रयुक्ताः। भरतेन तदीये 'नाट्यशास्त्रे' स्त्री-विदूषक-परिचारिकादीनां वाङ्माध्यमत्वेन प्राकृतभाषानुमिता। कुत्रचित् क्रियते प्रादेशिकभाषाणां प्रयोगो नाट्यकृद्भिः। यथाभट्टमथुरानाथदीक्षितेन 'भूभारोद्धरणम्' इति नाटके प्रादेशिकभाषाया व्यवहारः कृतः प्राकृतभाषां परिवर्त्य। किञ्च, 'भारतविजयनाटक' इत्यत्र प्राकृतभाषायाः स्थाने नेपालदेशस्य

नेवारीभाषां प्रयुङ्क्ते कवयिता। राधावल्लभानां नाटकानां भाषायां कुत्रचिदाधुनिकसूक्ति-प्रवचनानामपि प्रयोगो द्रष्टुं शक्यते।

| वङ्गभाषायाम् | | संस्कृतभाषायाम् | |
|---|---|---|---|
| 1. | प्रथमे ग्रासे माछि पडलो | 1. | प्रथमे ग्रासे मक्षिकापातः |
| 2. | खिदेते पेटे चुँया डन मारछे | 2. | काकाः क्रन्दन्ति ममोदरे |
| 3. | कारुर पौषमास कारुर सर्वनाश | 3. | चात्रिमां पौषमासः मम तु सर्वनाशः |
| 4. | तोमार मुखे फुल चन्दन पडुक | 4. | भवतां मुखे धृतसर्करा |
| 5. | यतक्षण श्वास ततक्षण आश | 5. | यावत् श्वासः तावदाशः |
| 6. | एक ढिले दुइ पाखि मारल | 6. | एकलोष्ट्रप्रहारेण पक्षिद्वयघातनम् |

उदाहरणं यथा - ‘इत्थं च सर्पोऽपि मृतो यष्टिकापि न भग्ना’, लवणमरिचमिश्रणपुरःसरं मां विषयीकृत्य यद्वा तद्वा गुरोः पुरो जल्पिष्यसि’ निद्रित आसीत् किं तदासौ नासिकायां सर्षपतैलं प्रक्षिप्य’, ‘प्रथमे ग्रासे मक्षिकापातः’ इति। प्रादेशिकसाहित्यानां प्रवादप्रवचनानि संस्कृतायितान्यभवन् स्वच्छन्दसा, यथा-‘बद्धा मुष्टिः लक्षाधिकमूल्या’ (माराठिभाषायाम् -- ‘झाक्ली सव्वा लखाची’), ‘दुलदुलायितनेत्रकाः’, ‘दत्वा करं वक्ष्यामि ते’ चेति।

## आधुनिकसंस्कृतकवितायां परिवर्तनम्

आधुनिकताद्यतनकालस्य कवितास्वात्मेवाभाति। यतः कवितायाः सर्वाङ्गेष्वनुस्यूतेयं वर्तते। दृक्पत्रिकायां रवीन्द्रपण्डामहाभागेनाधुनिककविताया वैशिष्ट्यान्युल्लिखितानि -

1. मुक्तच्छन्दोबद्धा रचना

2. प्रान्तीयभाषाणां छन्दसां स्वीकरणम्

3. सरलसंस्कृतस्य प्रयोगः

4. वास्तविकताया अभिधेयाभिव्यक्तिः

5. नवीनशैली

6. क्षुद्रकविता

7. चित्रकल्पानां प्रयोगः

8. प्रादेशिकवैदेशिकभाषाजानां शब्दानां संस्कृतीकरणम्

9. बिम्बात्मकादिनवीनविधानां प्रचलनञ्चेति।

आधुनिकसंस्कृतकवितानां परिवर्तनं बहिरङ्गान्तरङ्गभेदाद् द्विधा व्याकर्तुं शक्यम्

**अर्वाचीनसंस्कृतनाटकेष्वागतानि प्रमुख्यपरिवर्तनानि**

भरतमुनेर्नाट्यशास्त्रं भारतवर्षस्य ललितकलायास्तदन्तर्गतसङ्गीतनाट्यनृत्यादिविधानां मार्गप्रदर्शकम्। किन्त्वाधुनिकसंस्कृतनाट्यशास्त्रं पूर्णतया नानुकरोति नाट्यशास्त्रम्। विज्ञानपरिस्फूर्तिकमनुजसभ्यतायां लोकरुच्यनुसारं अर्वाचीनसंस्कृतकवयः स्वनाटकेषु परिवर्तनान्यानेतुं नित्यं विनूतनान् प्रयोगांश्च कर्तुं दृश्यन्ते ते कृतप्रयत्ना विवशाश्चा। परमेतत्सुखदं यत्तत्परिवर्तनेषु सत्स्वप्यर्वाचीनसंस्कृतनाटकानां कालिदासादीनां नाटकैः सह साम्यं संलक्ष्यते। आधुनिकनाटकान्यस्मज्जीवनसमस्याभिः साक्षात्तया सम्बद्धानि। अतो दृग्गोचरीभवति अर्वाचीननाटकानां परिवर्तितस्वरूपं भाषाभिव्यक्ति-शैली-वस्तु-शिल्प-गीतादिप्रसङ्गेषु।

**वैदिशिकशब्दानां संस्कृतीकरणम्**

वैदेशिकशब्दानां संस्कृतीकरणं तेषाञ्च साक्षात्तया प्रयोगोऽद्यतनकालीननाटकेषु द्रष्टुमलम्। किञ्च, वङ्गाला-ओडिया-हिन्दीप्रभृतिभाषाणां शब्दाः प्रयुज्यन्ते नाट्यकृद्भिरनायासेनैव। दिङ्मात्रमुदाहरणं यथा -

| **आङ्गलभाषायाम्** | **संस्कृतभाषायाम्** |
|---|---|
| 1. Loud-speaker | 1. ध्वनियन्त्रम्, ध्वनिविस्तारकयन्त्रम् |
| 2. Pastry | 2. पिष्टकम् |
| 3. Boy-bearer | 3. बालसेवकः |
| 4. Morning-alarm-sound | 4. घट्टकोद्बोढकध्वनिः |
| 5. Gas | 5. मञ्जुषा |
| 6. Electric-calling bell | 6. विद्युद्घण्टिकास्वरः |
| 7. Salute | 7. एकहस्ताभिवादनम् |

तथाहि केरोसिन, बैडमिण्टन (Badminton), टेनिस् (Tennis), पोलिस् (Police), बस् (Bus), **चेति** व्यवहारिकशब्दानां सम्यक्तया बहुविचित्रितः प्रयोगः संदृश्यते। उदाहरणानि यथा --

1. 'नगरे किं **ट्राम-बस्कर्मिणां** धर्मघटः प्रचलति'।

2. 'मासं यावद्-**ग्यासो** नास्ति, **क्यारोसिनं** किं दुर्लभम्'।

चेत्यादीनि। अपि च, पट्का-तुवरी-प्रभृतीनां वङ्गीयशब्दानां क्वचिदपरिवर्तिततया, कुत्रचिद्वा प्रत्ययविभक्त्यादिसंयोगेन सुविन्यस्तं शब्दपरिपाकं कुर्वन्त्यर्वाचीननाट्यकाराः।

राधावल्लभत्रिपाठिनः 'सुशीलानाम्नि' नाटके सुशीलायाः जीवनव्यथायाः, संघर्षस्य, जिजीविषायाः नियतिविधानस्य चात्र साङ्केतिकी व्यञ्जना वर्तते। उदाहरणं यथा ---

स्त्री ५ -- न इदानीं भेतव्यम्। यावता विभेम तावतैव भाययन्ति पुरुषा अस्मान्। यदि साहसं कुर्मस्तर्हि न किमपि कुर्यात् पुरुषः।

स्त्री १ -- सत्यम् सत्यम्। स्त्री आत्मनैवात्मानमुद्धरेत्। आत्मनैव तया जीवितव्यम्।

सुशीला --- जीविष्यति स्त्री, मरिष्यति पुरुषः'' इति। वस्तुतो, यस्य कस्यापि नाटकस्य सर्वाधिकः संवेदनशीलः पक्षस्तस्य भाषा, संवादश्च भवतः। किन्तु, आधुनिकसंस्कृतनाटकस्य भावपक्षः कलापक्षश्च नाट्यकर्तुरुपस्थापयतः साहित्यिकरेखाचित्रमूर्द्धम्।

**नाट्यशैलीगतं विवर्तनम्**

शैलीगतदृष्ट्याधुनिकसंस्कृतनाटकं परिवर्तितरूपं दधाति पाश्चात्यनाट्याङ्गिकस्यानुकरणं कृत्वा। तथाहि, अर्वाचीननाट्यकृद्भिरुपेक्षितानि भरतप्रवर्तितानि नान्दी-भरतवाक्य-प्रस्तावना-पताका-प्रवेशक-विष्कम्भकादीनि नाट्यतत्त्वानि। किन्तु, नैतत्सत्यं यदाधुनिकनाट्यकारैर्न क्रियन्ते सर्वथा भरतविश्वनाथादीनां कथितानि नाट्यतत्त्वानि, परं तादृशाः प्रयासा विरला एव दृश्यन्ते। तथाहि प्राचीननाट्यकृद्भिरङ्कात्मको विभागः प्रकल्पितः। परन्त्वर्वाचीनैर्दृश्यात्मको विभागो गृहीतः प्रतीच्यनाट्यरीत्याः । यधा ---- रमाचतुर्धुरीमहाभागाया विरचितं श्रीरामकृष्णजीवनाधारितं 'युगजीवनमिति' दशभिर्दृश्यैर्विभक्तम्, 'निवेदितानिवेदनमिति' द्वादशभिर्दृश्यैर्युक्तम्। नित्यानन्दस्मृतितीर्थस्य यतीन्द्रविमलचतुर्धुरिणश्च दृश्यकाव्येष्वपि दृश्यात्मकविभाजनं नयनपदवीमेति। 'तथाप्यवश्यं कर्तव्या नान्दी विघ्नोपशान्तये' इति नान्द्यवश्यकर्तव्यतयालंकारिकैरभ्युपगता। किन्तु केषुचिद्रूपकेषु नान्दी न विलसति। उदाहरणत्वेन वक्तुं शक्यं--सिद्धेश्वरचट्टोपाध्यायस्य 'ननाविताडने' नान्द्या नास्त्युल्लेखः। बहुषु रूपकेषु भरतवाक्यं नैव संलक्ष्यते केषुचिदपि स्थलेषु दृश्यमानं भरतवाक्यं पद्धतिं नानुसरति। वीरेन्द्रकुमारभट्टाचार्यस्य 'वेष्टनव्यायोगो'ऽस्यैवोदाहरणम्।

विज्ञानसभ्यतायाः कारणादद्यतन-कालीनमानवानामभिनयदर्शनस्य समयाभावो नितरां सन्दृश्यते। तेषामावश्यकतां रुचिञ्चाभिलक्ष्याद्यत्वे संक्षिप्तनाटकान्येकाङ्कीरूपकानि लिखितानि भवन्ति। तथाहि, आधुनिकसंस्कृतनाट्यप्रपञ्चे एकाङ्की'रेडिओ'नाटकानां बाहुल्यं दृष्टिपथमायाति। 'रेडिओ'नाटकं नाम वेतारयन्त्रेण प्रचारितं स्वल्पक्षणाभ्यन्तरे समाप्तिं गतम्। तदुदाहरणं यथा---त्रिपाठिनः 'प्रेक्षणसप्तकमिति' नाटकसंग्रहस्य सर्वाणि नाटकानि वेतारयन्त्रेण प्रचारितानि। किञ्च, 'रेडिओ' रूपकस्योदाहरणं तावद् हरिदत्तशर्मणः 'आक्रन्दनम्', रमाकान्तशुक्लस्य 'कचदेवयानी' चेति। अद्यतनकालीनज्वलत्समस्याभिराधुनिकबोधैश्चोपेतान्येतानि प्रेक्षणकानि संकलितानि। अर्वाचीनसंस्कृतनाट्यपरिसरे 'छाया' नाटकानामार्विभावो युगान्तकारीति। जे.टी.परीखस्य 'छायाशकुन्तलमु'ल्लेखयोग्यमेकं छायानाटकम्। पास्चात्त्याङ्गिकेन प्रभावितेन वी. राघवन्महोदयेनारब्धं सर्वप्रथमं गीर्वाणवाण्यां यात्रामूलकानाम् ओपेरानाटकानां प्रचलनम्। तस्य 'रासलीला', 'प्रेक्षणकत्रयी', 'कामशुद्धिः', 'विमुक्ति'-श्चेत्यादिषु नाटकेषु तादृशः प्रयोगो द्रष्टुं शक्यः। विश्वनाथेन नाटकस्य नायकस्वरूपविषये भणितम् --

''प्रख्यातवंशो राजर्षिर्धीरोदात्तः प्रतापवान्।

दिव्योऽथ दिव्यादिव्यो वा गुणवान् नायको मतः''। इति।

किन्तु धीरोदात्त-धीरललितनायकानां स्थले सामान्यनिम्नवर्गीयचरित्राणि नायकत्वेन स्थानं लभन्तेऽर्वाचीनसंस्कृतनाटकेषु। पाश्चात्त्यनाट्यरीतिं प्रादेशिकनाट्यधारां वाश्रित्य भावनाट्यानि (Abstract Plays), प्रतीकनाट्यानि (Symbolic Plays) वा विरच्यते। एतान्येव संस्कृतनाट्यधारायामभिनवसंयोजनरूपेण विवेचनीयानि। प्रसङ्गेऽस्मिन् प्राच्यनाट्यतत्त्ववेत्ता नाट्यनिर्देशकः सिद्धेश्वरचट्टोपाध्यायः समुल्लेखार्हः। तेन विरचितेषु रूपकेषु व्येशट्-व्यखट्--वादलसरकारादीनां नाट्यकाराणां संलक्ष्यते प्रभावः सुस्पष्टतया।

सिद्धेश्वरस्य 'अथ किम्' **इति** नाटके पात्रादयः श्रेणीविशेषाणां कुर्वन्ति प्रतिनिधित्वम्। मध्यवित्तश्रेणीभाजां शिक्षितानां जनानां प्रतिनिधित्वेनोपस्थापितं 'क' इति चरित्रं,

निम्नमध्यवित्तश्रेणीस्थितानां प्रतीकरूपेण 'ख' इति चरित्रं, राजनैतिकदलेषु मुख्यपात्रानां प्रतीकतयावतारितानि 'ग'-'घ'-'ङ' प्रभृतीनि चरित्राणि। कुत्रापि पात्रादयो न केवलं मञ्चस्थाः परं दर्शकेभ्य एव समागताः। अत्रेदं सम्प्रधार्यं यत् सिद्धेश्वरस्य नाट्यरीत्या सह पश्चात्त्यनाट्यतात्त्विकस्य ब्रेशट्पादस्य मतसाम्यं बिभर्त्ति।

"A-Effect as a technique is to make spectator adopt an attitude of enquiry and criticism in his approach to the incident" (Brecht on Theatre).

अर्थान्नाटकस्य दर्शकैः सह नाटकचरित्राणां सम्पर्कः स्यादिति। सिद्धेश्वरस्य 'अथ किम्' **इति** 'ननाविताडनम्' **इति** च नाटकद्वितये प्रतिफलनस्यैवोपलभ्यमानम्।

अर्वाचीनकालस्य नाटकेषु स्मृतिदृश्यविधिः (Flash Back System) प्रयुक्तः। अभिराजराजेन्द्रमिश्रस्य 'एकं सद् विप्रा बहुधा वदन्ति' इत्यस्मिन् रूपके स्मृतिदृश्यविधेर्दृश्यते प्रयोगः। रमाकान्तस्य 'ध्वनिरूपकद्वयं' वर्तते --- 'पण्डितराजीयम्', 'अभिशापम्' चेति।

साम्प्रतं नाट्यकारैः वीथिनाटकानि तथा च उद्भटनाटकानि ग्रथितानि। क्षेत्रेऽस्मिन् हर्षदेवमाधवस्य योगदानमनस्वीकार्यम्। तेन 'मृत्युरयम्', 'कस्तूरीमृगोऽस्ति', 'परीक्षा', 'कल्पवृक्ष'श्चेत्यादीनि नाटकानि लिखितानि। मृत्युविषये द्वयोः प्रेतयोर्वार्तालापविषयमाधारीकृत्य 'कल्पवृक्षाख्ये' सप्त नाटकानि संगृहीतानि वर्तन्ते। कल्पवृक्षनाटके विशेषवेशभूषाणामावश्यकता न भवतीति कृत्वा प्रवृत्तिरियं वीथिनाटकेषु द्रष्टुं शक्यते।

**शास्त्रीयग्रन्थानां नवीनव्याख्यानम्**

किमपि साहित्यं समालोचनाग्रन्थान् तथा चालंकारशास्त्रं विहाय पूर्णत्वं न लभते। अतः, साहित्ये अलंकारशास्त्रस्य महद्दानं वरीवर्त्ति। ब्रह्मानन्दशर्मणा तस्य नन्दनतत्त्व-विषयकदार्शनिकभावाः रसविषयकतत्त्वचतुष्टयञ्च विलिख्य -- 'काव्यशास्त्रालोकः', 'अभिनवरसमीमांसा', 'रसालोचनम्', 'वस्त्वलंकारदर्शनम्' इति शीर्षकैः परिवेशितानि। तन्मते

रसाभिज्ञता नाम सत्यानुभूतिधार्मिक-काव्यिक-वैज्ञानिकाद्यभिज्ञतालोकैर्यदुत्पद्यते। राष्ट्रपतिपुरस्कारेण सभाजितस्य सीतानाथाचार्यस्य कवितायाः स्वरूप-गुण-कार्यकारित्वादिकमादाय 'कविते विश्ववन्दिते' इति १०५ मितश्लोकैः पूरिता कविता वर्तते। एतान्विहायार्वाचीनकाले नन्दनतत्त्वविषयकाः अलंकारग्रन्थाः त्रयोदशाधिकद्विसहस्त्रसंख्यका उपलभ्यन्ते। तेषु प्रामाणिकत्वेन केषाञ्चिन्नामान्युल्लिख्यन्ते —

| | **काव्यशास्त्रमूलग्रन्थाः** | **आलंकारिकाः** |
|---|---|---|
| 1) | अविनवकाव्यालंकारसूत्रम् | राधावल्लभत्रिपाठी |
| 2) | कवितारहस्यम् | मथुराप्रसाददीक्षितः |
| 3) | काव्यकौमुदी | हरिदाससिद्धान्तवागीशः |
| 4) | अलंकारसूत्राणि | चन्द्रकान्ततर्कालंकारः |
| 5) | सौन्दर्यपञ्चाशिका | रेवाप्रसादद्विवेदी |
| 6) | अलं ब्रह्म | ,, |
| 7) | नाट्यानुशासनम् | ,, |
| 8) | काव्यालंकारकारिका | ,, |
| 9) | साहित्यशारीरकम् | रेवाप्रसादद्विवेदी |
| 10) | सौन्दर्यकारिका | जगन्नाथपाठकः |
| 11) | अभिराजयशोभूषणम् | अभिराजराजेन्द्रमिश्रः |
| 12) | अलंकारदीपिका | आशाधरभट्टः |
| 13) | कोविदानन्दः | ,, |
| 14) | मन्दारमरन्दचम्पूः | कृष्णकविशर्मन् |
| 15) | साहित्यसन्दर्भः | शिवाजी उपाध्यायः |

**सङ्गीतस्य समावेशः**

अर्वाचीनदृश्यकाव्येषु सङ्गीतानां प्रयोगविधौ प्रवृत्तिर्दृश्यते। केषुचिद्रूपकेषु रागानिर्देशपुरःसरं दीर्घगीतानां समावेशो लक्ष्यते। श्रीरामवेलणंकरमहोदयस्य 'सङ्गीतसौभद्रे' तथा च 'कालिदासचरिते' एतादृशाः प्रयोगा नयनयोरापतन्ति। मूलशङ्करमाणिक-लालयाज्ञिकस्तदीयेषु ऐतिहासिकरूपकेषु (संयोगितास्वयंवरच्छत्रपतिसाम्राज्य-प्रतापविजयादिषु) प्रयुक्तेषु गीतेषु तालस्थायि-अन्तरादीनां निर्देशः कृतः। यतीन्द्रविमलरचितनाटकेषु स्तोत्रानुकृतानां भक्तिसङ्गीतानां प्राचुर्यं लक्ष्यते। अपि च, वीरेन्द्रकुमारस्य 'श्रीगीतगौराङ्गमिति' संस्कृतगीतिनाट्यं ६रागैः, ७५रागिणीभिः, ८१गीतैर्गुम्फितम्। 'छत्रपतिसाम्राज्यस्य' चतुर्थाङ्के मार्शालगीतं, 'वङ्गीयप्रतापस्य' तृतीयाङ्के धीवरगीतं, 'मेवाडप्रतापस्य' प्रथमाङ्के भीलगीतञ्च वर्तन्ते। एतेषु रूपकेषु नास्ति किमपि छन्दः, सर्वाणि गीतानि प्रायेण मुक्तकानि। प्रादेशिकसाहित्ये मुक्तकगीतानां व्यवहारः प्रथमतया समारब्धः।

**नृत्यनाटिका**

सङ्गीतेन सह नृत्यमपि यस्मिन् दृश्यकाव्ये परिवेशितं भवति, सा नृत्यनाटिका। प्रयोगोऽयम् अर्वाचीनसंस्कृतस्य परिवर्तितरूपं प्रद्योतयति। एस् रङ्गनाथेन 'Post Independence Sanskrit Dramas' इत्यस्मिन् ग्रन्थे वलमालाभवालकरस्य दृश्यत्रयसंवलितस्य रामवनगमनस्योदाहरणं प्रस्तुतं यत्र यमन-हमीरराग-काफीराग-सारङ्गराग-वसन्तरागाख्यानां सुष्ठु समावेशो दृश्यते। वस्तुत उत्कलप्रदेशे नृत्यनाटिका विद्या प्रसिद्ध्यति। गणपतिबैष्णवपाणिना प्रस्तुतशैलीमाधारीकृत्य बैकुण्ठबिहारीनन्दशर्मणा काश्चन नृत्यनाटिका रचिताः। तद्यथा---'अभिशप्तचन्द्रम्', 'मदनदहनम्', 'मातृशक्तिः', 'दक्षयज्ञः', 'दानवीरहरिश्चन्द्र'श्चेत्यादयः। नलिनीशुक्लाया 'राधानुनय' इति नृत्यनाटिकायामेकत्र कत्थकशैली समादृता –

''कन्दर्पः कन्दर्पः तत्त थेइ थेइ।

धुमकिट धक धकिट धकिट।

तक तक तक तकिट तकिट।

नटवरः परिरजयः जयति विजितकालः विजितकालः।। इति।

किञ्च, नाट्यशास्त्रे नेपथ्यसंगीतस्य प्रसङ्ग उक्तः -

'एतानि तु बहिर्गीतान्यन्तर्यवनिकागतैः।

प्रयोक्तृभिः प्रयोज्यानि तन्त्रीभाण्डकृतानि च''।। इति।

नेपथ्यसंगीतस्य प्रासङ्गिकत्वं नाट्यकारस्य शम्भुमित्रस्य रचनायामपि समुपलब्धम्। समीरितम् - "Acting and background music are complimentary to each other .... Music enlightens the acting on stage.'' इति । अर्वाचीनसंस्कृतवाङ्मये नेपथ्यसंगीतस्य (Background music) स्रष्टा तावत् सिद्धेश्वरचट्टोपाध्यायः। तेन 'ननाविताडनमिति' रूपके संगीतोऽयं सम्प्रयुक्तः।

**रङ्गमञ्चगतं विवर्तनम्**

प्राचीनकाले रङ्गमञ्चव्यवस्थायां या जटिलता आसीत् सा प्रायः लघुक्रियते अर्वाचीननाट्यकारैः। तथाहि अद्यतनीयं संस्कृतनाटकं मुक्ताकाशे वृक्षतले वाभिनीतं भवति। वीथीनाटकानामपि प्रदर्शनं यत्र तत्र द्रष्टुं शक्यते इदानीन्तने काले। पाणिक्करशान्तिनाथघोषादीनां नाट्यनिर्देशकानां नाट्याभिनयमञ्चादिव्यवस्थापनायां विविधं विवर्तनं संदृश्यते।

**संस्कृतगद्यकाव्यस्याधुनातनप्रवृत्तयः**

अधुनातनगद्यकाव्यस्य सन्त्यनेके मार्गा कथोपन्यासयात्राजीवनवृत्तादिवर्णनभेदाल्लसिताः। तथापि कथानामुपन्यासानाञ्च प्राधान्यं लक्ष्यते। कथासु लघुकथासु च न केवलं सरसवस्तुनिबन्धनं क्रियते, अपि तु देशकालानुरोधाद् विविधवस्तुवर्णनविच्छित्तिर्विराजते। अत्र कथानां प्रवृत्तिमूलानि प्रकरणानि दृश्यन्ते -

1. **प्रणयवर्णनपराः कथाः -** प्राचीनैरर्वाचीनैर्गद्यकाव्यकृद्भिः नायकनायिकयोः शृङ्गाररससिक्तः प्रणयसम्बन्धः सुनिपुणं निरूपितः क्षमारावमहाभागाया 'प्रेमरसोद्रेकः', भट्टमथुरानाथस्य 'प्रेम्णः', 'प्रतिदानमिति' सर्वोत्कृष्टाः कथाः।

2. **सामाजिककथाः -** समाजमुपेक्ष्य कविः काव्यं विरचयितुं नालम्। कथाकारा अपि सामाजिका इति कृत्वा समाजस्थितिमधिकृत्य निर्मितिर्निरताः। क्षेत्रेऽस्मिन् क्षमारावपादा अग्रगण्या। तां विहाय कलानाथशास्त्रि-केशवचन्द्रदासराधावल्लभत्रिपाठि-राजेन्द्रमिश्रादयः वर्तमानसमाजस्य पक्षवर्णने धुरिणः सन्ति।

3. **भावप्रधानाः कथाः -** भावप्रधानकथासु रेवाप्रसादद्विवेदिनः 'त्रिपादी', राधावल्लभस्य 'न ममार न जीर्यति', भट्टमथुरानाथस्य 'विषमा समस्या' चेति समुल्लेखार्हाः। एतासु कथासु मनोवैज्ञानिकं मार्मिकञ्चित्रञ्चित्रितम्।

4. **उपदेशकथाः -** यासां कथानामुपसंहृतौ सदुपदेशाः वर्तन्ते ता उपदेशकथा इति। केशवचन्द्रदासस्य 'महानिति' कथासंग्रहे नैका बालसुलभा उपदेशकथा विलसन्ति। किञ्च, 'धर्मस्य सूक्ष्मा गतिः', 'ईश्वरस्य धनदानक्रमः', 'बुद्धिमाहात्म्यम्', 'सद्गुरुश्चे'ति सत्त्युपदेशकथाः।

5. **लोककथाः** - कैश्चित्कथाकारैरर्वाचीनकाले बहवः लोककथा विरच्यन्ते। तासु कथासु ग्राम्यसाहित्यकल्पेषु दृश्यन्तेऽनेकाः लोककथाः, या अधुनापि प्रचलन्ति भारतीयग्रामेषु। उदाहरणं यथा---प्रभुनाथद्विवेद्विनो 'विंशतिवितस्तिदीर्घा नासिका', 'उद्यमिनौ बालकौ' चेति लोककथाद्वयम्। 'चन्दमामा' तथा च 'सम्भाषणसन्देश' श्चेति पत्रिकाद्वितये प्रभूता लोककथाः प्रकाशिताः सन्ति।

6. **हास्यकथाः -** अद्यतनकालस्य कथाकारास्तदीयकथासु हास्यरसस्य प्रयोगं कृत्वा सहृदयहृदयानां मनो रञ्जयन्ति। हास्यकथासु अप्पाशास्त्रिणो 'वेषमाहात्म्यम्', 'पुरोहितधौर्त्यम्', प्रभुनाथद्विवेदिनः 'दूरभाषः', 'महाकविः', 'शिखापण्डितश्चे'ति कथाः हास्यप्रधानाः।

एतान्विहायापि राजेन्द्रमिश्रस्य 'इक्षुगन्धा', 'राङ्गडा', कलानाथस्य 'महांश्च', बनमालीविश्वालस्य 'नीरवस्वनः', 'बुभुक्षा', 'वीणापाणिपाटन्या' 'अपराजिता' चेति प्रमुखाः सन्ति। आधुनिककालस्य कथाकृत्स्वन्यतमत्वं भजते बनमालीविश्वालो यः एकलप्रयासेन कथासंग्रहत्रयं---नीरवस्वनः, वुभुक्षा, जीजिविषा चेति रचितवान्।

7. **उपन्यासः -** साधारणतया वङ्गसाहित्ये उपन्यासस्यास्माभिः प्रयोगो दृश्यते। किन्तु संस्कृतसाहित्ये गद्यकाव्यविधायामुपन्यासोऽन्तर्भूक्तः। परमर्वाचीनसंस्कृतसाहित्ये सर्वप्रथममम्बिकादत्तव्यासेन 'शिबराजविजय' इत्यनेनोपन्यासो लिखितः। गद्यकाव्यस्य भेदयोः कथाख्यायिकयोः समन्वयो हि उपन्यासः। रामजी-उपाध्यायस्य 'द्वा सुवर्णा', केशवचन्द्रदाशस्य 'विसगाः', मेधाव्रतशास्त्रिणः 'कुमुदिनीचन्द्रः', राजगोपालाचार्यस्य 'शैवालिनी', 'कुमुदिनी', मथुरानाथभट्टस्य' 'आदर्शरमणी' 'अनादृता' चेत्यादयः प्रख्याता उपन्यासाः। द्वारिकाप्रसादस्तथा देवीदयालश्च युगपत्तया विवाहे पणव्यवस्थामादाय 'दिव्यज्योतिरिति' उपन्यासं रचितवन्तौ। केशवचन्द्रदासः उपन्यासकृत्स्वन्यतमत्वं भजते, यो द्वादशाधिकान् उपन्यासान् ग्रथितवान्। तस्योपन्यासेषु अन्तर्दृष्टिः; मानसिकद्वन्द्वः, भारतीयकृष्टिदर्शनिकतत्त्वानि च कल्पनायास्तलस्पर्शेण प्रतिविम्बितानि वर्तन्ते। 'तिलोत्तमा', 'शीतलतृष्णा', 'आवर्तम्', 'पटाका', 'ऋतम्', ओँ शान्तिश्चेत्यादयः श्रेष्ठा उपन्यासाः।

अत्रेदमुल्लेखार्हं यदर्वाचीनकाले वङ्गवास्तव्यस्तारापदभट्टाचार्यो विशिष्टकथाकारेष्वन्यतमो वर्तते, येन न केवलं वङ्गभाषया लिखिता बहव्यः कथाश्चापि संस्कृतभाषया। तासु कथासु द्वादश कथाः आहत्य 'द्वादश कथेति' ग्रन्थः प्रकाशितः। कथाकृत्तारापदस्य कथासु मनोवैज्ञानिकं, सामाजिकं, हास्यरसाश्रितं, पौराणिकञ्च वस्तुजातं स्थानं लभमानमासीत्।

## चित्रकथा (Pictorial-story)

चित्रकथाशब्दस्याङ्गलरूपान्तरं तावत् 'Pictorial-story' इति, यस्यार्थोऽयमाङ्गलशब्दकोषे - 'A magazine especially for children, that tells

stories through pictures.' इति। शिशूनां मनोरञ्जनेन सममुपदेशप्रदानञ्च चित्रकथाया उद्देशम्। २००६ख्रीष्टाब्दतः धारावाहिकभावेन चित्रकथायाः प्रकाशनमभवत्। ग्रन्थस्य कथाकारस्तावद्वेणुवारियत्, चन्दन-चूलुस्सेरिपादः, एम्. मोहनदासश्च। प्रस्तुते कथासंग्रहे एकादश चित्रकथा विलसन्ति। प्रत्येकं चित्रकथाया मूलं वस्तु पौराणिकम्, महाभारतीयञ्च। किञ्च, 'सम्भाषणसन्देशः', 'कथासरित्' चेति द्वयं विशिष्टं कथामूलकपत्रिकारूपम्।

**ललितनिबन्धसाहित्यम्**

एसे (Eassy), मोनग्राफ् (Monograph), ट्रीटीज् (Treatise), चेत्यभिधानानि वहन्ती सेयं विधा विषयस्यैकस्य विवेचनं कुर्वाणान् बन्धान् निर्दिशति, यत्र तद्विषयकस्य परिज्ञानस्य संक्षिप्तः समावेशः क्रियते। अपरतः, हृदि उन्मीषन्तीनां भावानां ललितमुद्गमनमपि निबन्धस्यापरः प्रकारो यः 'Personal Essay' इत्याख्यायते पाश्चात्त्यहिन्द्यादिभाषासु ललितनिबन्धादिनामभिर्व्यपदिश्यते। किन्तु प्राचीनसंस्कृतसाहित्ये ललितनिबन्धानां प्रसारो नैवालक्षि। परं विंशशताब्द्याः प्रारम्भत एव संस्कृतपत्रिकासु नैकविधा निबन्धाः प्रकाशिता अवर्तन्त। ललितनिबन्धाः ललितकथाः वा व्यङ्ग्यकथाभिः सह मिश्रिताः त्यक्तवत्यः स्वीयां प्रतिष्ठाम्। अर्वाचीनसंस्कृतपरिसरे कविशिरोमणिभिः निबन्धविद्योति शीर्षकं पुस्तकं व्यरचि, यत्र बन्धानां प्रकाराः, लेखनविधाः, चान्ये शिक्षार्थिनामुपयोगयोग्या विषया विशदीकृता आसन्। निबन्धविद्ययानया समं वर्णनात्मक-विवेचनात्मक-यात्रा-वृत्तात्मक-विचारात्मक-शोधात्मक-ललितनिबन्धानां विविधवर्गविभक्तानां निबन्धानां विवोधनाय त्रयोदश निबन्धान् कलानाथपितृव्यैर्विलिखितान्समाकल्य कलानाथशास्त्रिपादेन 'प्रबन्धपारिजाताख्यो' ग्रन्थः प्राकाशि। ग्रन्थस्यास्य ललितनिबन्धेषु 'किन्तोः कुटिलता' इति, 'बालकभृत्यः' 'मकारमहामेलक'श्चेत्यादयः विशिष्टत्वं भजन्ते।

नृसिंहदेवेन **प्रस्तावचन्द्रिकेति** ललितबन्धसंकलनं प्रकाशितम्। तत्र षोडश विविधविषयका निबन्धा यथा 'सङ्गः', 'रमते न मरालस्य मानसं मानसं विना', 'विद्या', 'छिद्रेष्वनर्था बहुलीभवन्ति' चेत्यादयः।

संस्कृतप्रबन्धरत्नाकरः प्रकाशितः मायादत्तपाण्डेयशास्त्रिणा । तत्र 'ईश्वरोऽस्ति वा', 'क्रोधः', 'पृथ्वीग्रहः', 'ब्रह्मचर्य'मित्यादयो निबन्धा विलसन्ति। ललितनिबन्धस्यापरः प्रकारो व्यक्तिव्यञ्जकः। ललितनिबन्धत्वेन व्यक्तिव्यञ्जकनिबन्धत्वेन वा या शैली आधुनिकभारतीयभाषासु प्रचलिता, तस्याः प्रथमो निबन्धकारो भट्टमथुरानाथशास्त्रीति निश्चप्रचमभिधातुमलम्। विष्णुकान्तशुक्लः पत्रपत्रिकासु तादृशान् निबन्धान् व्यलिखत्। कलानाथशास्त्रिणः केचिल्ललितनिबन्धाः आख्यानवल्लरीति संकलनग्रन्थे मुद्रिता आसन्। साम्प्रतिके काले 'छन्दसश्छटा', 'पथिकानुभूतिः', 'कुक्कुरस्य भाग्यञ्चेति' ललितनिबन्धा दृष्टिपथमायान्ति।

**अलंकारयोजनायां परिवर्तनम्**

अधुना कवयः प्राचीनरूढोपमानां स्थले नूतनोपमानानि व्यवहरन्ति स्म। इतरभाषाणामुपमानानि संगृह्य प्राचीनबन्धनानि त्यक्त्वा जाता विंशशतकस्य संस्कृतकविताधुनिका। उदाहरणं यथा

'समुद्रः
होनालुलुसुन्दरिहस्तसन्निभो मसृणः।
समुद्रः
ओडीसीयमहाकाव्यनायक-'ओडिस्युस' प्राप्तशापप्रतिभटः कयालः' इति।

हर्षदेवमाधवेन होमरोपमां (Homeric Simile) स्वककाव्येषु संयुज्य उपमानस्य दीर्घ वर्णनं कृतम्। अनन्तरमुपमेयेन सममुपमानस्य तुलना क्रियते। दिङ्मात्रमुदाहरणं यथा--- ''यथा

कोऽपि महाविषादग्रस्तः,
सर्वनाशवातचिकितः,
स्वजनमृत्युदर्शनभीतः,
विपद्वज्रपातवशीभूतः,
शोककलुषितमानसः,

अज्ञातभयवेपमानः,

................,

रोदितुमिच्छन्नपि

अश्रूणि न मुञ्जति

न मोक्तुं शक्नोति

तथैव

ध्वंसावशेषाः स्थिताः,

वेदनाभरव्यथिताः

रोदितुमक्ताः

साक्षाद्घनीभूतरोदनाकारा इव

शोकात् पतनदिवसं प्रतिपालयन्ति''। इति।

एवञ्चाधुनिकता संस्कृतकाव्यजगति द्रष्टुं शक्यते उपमानयोजनपरिवर्तने। किञ्च, आधुनिकसंस्कृतसाहित्ये अलंकारव्यवहाररीत्यां दृश्यन्ते उपमानस्य नवीनत्वम्, अलंकारस्य सजीवारोपणम्, अन्योक्तेः सफलप्रयोगः, वक्रोक्तेश्चमत्कारत्वम्, प्रकृतेर्मानवीकरणम्, उपमानोपमेययोः सार्थकव्यवहारश्चेति।

**अर्वाचीनसंस्कृते छन्दसामभिनवत्वम्**

नवीनच्छन्दसां प्रासङ्गिकत्वं स्वीकृत्य राधावल्लभत्रिपाठिनोक्त -

''उन्मीलिता नवीना

मार्गा दृष्टनवीनपद्धतयः।

छन्दस्चलितं भूत्वा

पाथेयं दीर्घयात्रायाम्''।इति।

अर्वाचीनाः कवयः पारम्परिकच्छन्दोभिः सह छन्दसां व्यत्ययं कृत्वा उत छन्दोद्वयस्य मिश्रणं विधाय काव्यानि ग्रथयन्ति। केचिद्वा कवयो गद्यरीत्यापि श्लोकान् रचितवन्तः।

अथवानुष्टुभः पादत्रयमवलम्ब्य श्लोको विनिर्मितः। हर्षदेवमाधवाः जापानदेशीयां छन्दःपद्धतिं संस्कृते प्रयुञ्जन्ति। अपि च, कोरियादेशे प्रचलिते सीजो-छन्दसि, तान्काछन्दसि, हाइकुच्छन्दसि च संस्कृतकाव्यानि प्रणयन्ति। तत्र हाइकुच्छन्दोवैशिष्ट्यं तावत्---''पादत्रयात्मके सप्तदशाक्षरेऽस्मिन् पंक्तिः ५-७-५ संख्यका वर्णा सन्ति'' इति। उदाहरणं यथा हाइकुच्छन्दसः ---

''कॉलेज कन्या
सौन्दर्य-मधुकोशः
रूपस्य प्रपा''। इति।

अत्रेदमुल्लेखार्हं यत् हाइकुच्छन्दसा रचितं काव्यं **हाइकुकाव्य**मिति संज्ञयाभिधीयते।

तान्काछन्दसो वैशिष्ट्यं---पादपदञ्चात्मके एकत्रिंशदक्षरविशिष्टे पंक्तिः ५-७-५-७-७ संख्यका वर्णाः सन्ति। उदाहरणं यथा--

''गवाक्षे मुखम्
गवाक्षेऽस्ति वसन्तः
गवाक्षे चन्द्रः
वैद्यराजो वदति
अयं ते नेत्रव्याधिः''। इति।।

**अन्तरङ्गपरिवर्तनम्**

विम्ब-प्रतीक-मिथ-तरङ्ग-रूपकादीनि अन्तरङ्गपरिवर्तनस्योपकरणानि। अर्वाचीनसंस्कृतकाव्यं बिम्बं विहायापूर्णतामेति। अनया शैल्या कवयितुरनुभूत्या सह सहृदयानां सम्बन्धो जायते। एवंविधायाः कविताया वैशिष्ठ्यानि तावत् --- 1. वस्तूनां प्रत्यक्षनिरूपणम् 2. लयबद्धशब्दक्रमः 3. लाघवम् 4. सर्वग्राहिनी भाषा 5. इन्द्रियग्राह्यं विम्बञ्चेति।

अन्तरङ्गपरिवर्तनस्यापरमेकमुपादानं प्रतीकमिति। प्रतीकं कविताया ईदृशमेकमुपादानं येन सामान्यविषयस्यापि गौरवान्वितरूपमुपालभ्यते, चापि गूढातिगूढभावानामभिव्यक्तिरनायासेनैव व्यक्तीभवति। उदाहरणं यथा---

''बुद्धस्य भिक्षापात्रे
निमज्जतमस्ति
अणुबम्बदग्धनगरम्'' इति

**अनुसर्जनसाहित्यम्**

अनुसर्जनं नामेदृशं किञ्चन यत्र मूलस्य शब्दसम्पत्तेर्भावसम्पत्तेश्चमत्कारित्वं विहाय भाषान्तरीकरणं क्रियते। एतत्तु दृश्यते यत् कस्याश्चन भाषायाः प्रारम्भिकं साहित्यमनुवादात्मकं भवति।

अर्वाचीनसंस्कृतसाहित्यमपीदानीं कैशोरदशापन्नमित्यङ्गीकर्तुं न द्वैधीभावमापद्येरन् तत्त्वज्ञाः। विंशशताब्दी ह्यर्वाचीनसंस्कृतानुवादसाहित्यस्य कालः। सर्वप्रथमं विंशशतकस्य प्रथमे दशके महामहोपाध्यायो लक्ष्मण-शास्त्रि-तैलङ्वर्यः सेक्सपीयारस्य नाटकानि अनूदितवान्। भारतवर्षवद्बहुभाषाविशिष्टेषु देशेषु अनुवादकार्यं गुरुत्वपूर्णमिति कृत्वा समसामयिक-भारतीयसाहित्ये कर्मेदं निश्चप्रचं महत्पदमलंकरोति। भारतस्य धर्मार्थप्रचारकाः प्रथममेव तदीयधर्मग्रन्थानामनुवादं कुर्वन्ति। किन्तु, भट्टमथुरानाथशास्त्री असाधारणत्वेनेतरभाषाभ्यः विशेषेण प्राकृततस्तथा च विहारभाषाया दोहाछन्दसानुवादं कृत्वा यथाक्रमं 'गाहासतसई', 'सतसई' चेति अनुवादग्रन्थद्वयं ररर्च। विंशशतकस्य प्रारम्भिकलग्ने आधुनिकभारतीय-भाषाभ्योऽनुवादाः प्रकाशिता अवर्तन्त संस्कृतचन्द्रिकामञ्जुषादिपत्रिकासु। संस्कृतचन्द्रिकायां वङ्किमचन्द्रस्य वङ्गोपन्यासा संस्कृतभाषयानूदिता इन्दिरा(1907) - देवीकुमुद्वती (1903) लावण्यमयी(1906) - कृष्णकान्तीयस्य निर्वाण (1907) - प्रभृतिशीर्षकैः रेणुदेवीमहाभागया। सत्यदेवभार्मा पवित्रकोरान्ग्रन्थस्यानुवादञ्चकार 'संस्कृतं कुराणम्' इति नाम्ना। इराणस्य

गीतिकाव्यस्य 'ओमर-खैयामस्य' न्यूनातिरिक्ता अष्टानुवादका प्राप्यन्ते। तेष्वनुवादकेषु वीरेन्द्रकुमारभट्टाचार्यः, राजगोपाल-आयेङ्गारः, हरिचरण-शर्मा, सदाशिव-दङ्गे, अदिभट्ट-नारायण-दासश्चान्यतमाः। सुखमयमुखोपाध्यायेन तस्य 'दीनार्करराजकुमारहेमलेकम्' इति अनुवादः कृतः सेक्सपीयारस्य हेमलेट्नाटकस्य रोचिष्णुतया पाश्चात्त्यप्राच्ययोर्मेलबन्धनेन। वस्तुतोऽनुवादसाहित्ये वङ्गीया प्रतिभा चिरं **प्रगल्भा** चकास्ति। संस्कृतभाषायामनूदितवङ्गीयसाहित्यं द्विधा विभजयितुमलम् - 1) रवीन्द्रसाहित्यम्, 2) रवीन्द्रेतरसाहित्यमिति। किन्तु, रवीन्द्रसाहित्यस्यानुवादक्षेत्रे वङ्गीयकवीनां यादृशः प्रयत्नः, न तथा दृ**श्य**ते रवीन्द्रेतरसाहित्यानुवादे। तथाहि, अमरेन्द्रमोहनतर्कतीर्थभट्टाचार्येण गीतद्वयं, कामिनीकुमार-अधिकारिणा २५ गीतानि, कालीपदतर्काचार्येण सम्पूर्णा गीताञ्जलिः, दीपकघोषेन २०गीतानि चानूदितानि । निखिलेशचक्रवर्तिना ८०रवीन्द्रसंगीतानां, ७नजरुलगीतानां, ४अतुलप्रसादस्य गीतयः, २रजनीकान्तगीते, शिवदासवन्दोपाध्यस्य भाषायां भूपेनहाजारिकावर्यस्य २गीते चानूदितानि, यत्र मूलरचयितृणां भावसम्पत्तिरक्षु**ण्णा** वर्तते। अपरतः, रवीन्द्रभारतीविश्वविद्यालयस्य प्रधानाध्यापिकया इन्दिरा-चट्टोपाध्यायमहाभागया 'विराज मम नयनसम्मुखे' नाम्ना सान्द्रमुद्रिकैका रागगीतप्रकाशनालयतः प्रचरद्रूपतामेति, यत्र कवीन्द्ररवीन्द्रस्य दश गीतान्यनूदितानि लसन्ति। अवङ्गीयेषु मा. कृष्णानम्पूतिरिपादेन ४सङ्गीतानि, पुल्लेलश्रीरामचन्द्रवर्येण ९०३ गीतानि, निखिलेशचक्रवर्तिना, गौरीदत्तशर्मशास्त्रिणा २५७ गीतानि चानूदितानि। अपि च, ध्वानेशनारायणचक्रवर्तिना रवीन्द्रनाथस्य मुक्तधारायाः (1964) अनुवादः, तन्मयकुमारभट्टाचार्य-नारायणदास-राकेशदासैः कविगुरोः कथानामनुसर्जनं 'रवीन्द्रकथाकल्लोलिनीति' नाम्ना, विहारिलालमिश्रेण शरच्चन्द्रस्य सप्त कथानामनुवादः 'शरत्सप्तकमिति' (1996) नाम्ना, राकेशदासेन वङ्किमचन्द्रचट्टोपाध्यायस्य कथानामनुवादो 'मेघमल्लार' इति शीर्षकेन च प्रकाशिताः।

**अर्वाचीनमहाकाव्यरचनविधौ परिवर्तनम्**

अर्वाचीनकविभिर्महाकाव्यीयनायकधारणायाः परिवर्तनं कृतम्। विश्वनाथानुसारं महाकाव्यस्य नायको भवेद् धीरोदात्तः। अस्य लक्षणविषये विश्वनाथपादैरुक्तम्---

''सद्वंशः क्षत्रियो वापि धीरोदात्तगुणान्वितः।

एकवंशभवा भूपाः कुलजा बहवोऽपि वा''।। इति। किन्तु, साम्प्रतं साधारणमानवा महाकाव्यीयचरित्रत्वेन स्थानं लभन्ते। किन्त्वर्वाचीनकवयो भारतवर्षस्य स्वाधीनतान्दोलने समुत्सर्गकृता देशप्रेमिकास्तेषाञ्च जीवनं, प्रदेशविशेषस्येतिहास-सांस्कृतिक-राजनैतिक-सामाजिकजीवनं विवेकानन्दादिमहापुरुषाणां जीवनं महाकाव्यस्य विषया भवन्ति। क्षमारावमहाभागा, स्वामी भगवदाचार्यश्च महात्मागान्धिजीवनमाधारीकृत्य महाकाव्यद्वयं विरचितवन्तौ। द्विजेन्द्रनाथशुक्लस्य 'स्वराज्यविजयम्', साधुचरणमिश्रस्य 'गान्धिचरितम्' इति महाकाव्ययोर्वस्तु स्वाधीनतावाप्तये उत्सर्गकृतं गान्धिजीवनमिति। गङ्गाप्रसाद-उपाध्यायेन स्वकीये एकविंशाध्यायात्मके 'अयोध्यामहाकाव्ये' भारतीयसभ्यतायाः सृष्टिस्तथा विकाशो स्वामिदयानन्दजीवनञ्च वर्णितानि। हिमालयात् सागरं यावद्गङ्गायाः परिभ्रमणमाश्रित्य 'गङ्गासागरीयमिति' तथा च मेघनादस्य स्त्रियः सूलोचनायाश्चरित्रमवलम्ब्य 'सौलूकनीयमिति' महाकाव्यद्वितयं व्यरचयद् विष्णुदत्तशुक्ला। गजाननबालकृष्णप्रणीतं पञ्चविंशतिसर्गात्मकं 'वैनायकमिति' महाकाव्यं प्रकाशितम्। तत्र स्वाधीनतान्दोलने सावारकरस्य जीवनोत्सर्गोऽनन्यभङ्ग्या कविना वर्णितः। रेवाप्रसादद्विवेदिनो महाकाव्यत्रितयमध्ये दशसर्गप्रपूरिते 'राष्ट्रदेवतेति' महाकाव्ये देव्या सीताया आदर्शवादः, महत्तञ्च वर्णिते। ९८५७वर्षादारभ्य इन्दिरागान्धिमहाभागाया मृत्युं यावद्वृत्तजातम् ऊनत्रिंशत्सर्गैः प्रविभक्तं 'स्वातन्त्रसम्भवमिति' व्यरचि तेन। राधामोहनोपाध्यायेन विरचिते 'भारतविजयमिति' महाकाव्ये वैदिकयुगादारभ्य भारतीयसभ्यताया वृद्ध्या समं पोखरान्परमाणुबोम्ब-विस्फोटार्थमाब्दुलकालाम-वाजपेयीवर्ययोः प्रशंसापरका उक्तयो विव्रियन्ते। आधुनिकदेवस्य सत्यनारायणस्य वृत्तमाधारीकृत्य महाकाव्यीयरीत्यनुसारं प्रभविष्णुतया 'सत्यानुभावमिति'

महाकाव्यं महामहोपाध्यायेन कालीपदतर्काचार्येण रचितम्। तत्र कविनाभिनवच्छन्दः प्रयुक्तम्। परम्परावाहिषु महाकाव्येषु परम्परावैलक्षण्येन स्त्रीणामपि नायकत्वं संदृश्यते। उदाहरणं यथा--- रेवाप्रसादद्विवेदिकृते 'सीताचरिते', नारायणशुक्लरचिते 'ऊर्मिलीयमहाकाव्ये' स्त्रीनायकता परिदृश्यते। अपि च, इन्दिरागान्धिचरितमनन्यमेकं महाकाव्यमस्मिन् सन्दर्भे।

आधुनिककालस्य महाकाव्येषु बहवो देशप्रेमिकाः नायकायमाना अपि न भूपा न वा एकवंशभवाः। झाँशीश्वरीचरितादिषु केषुचिन्महाकाव्येषु नायककर्तृकधर्माद्यन्यतमपुरुषार्थप्राप्तिर्नापि सम्भवत्यभीष्टसिद्धेः पूर्वं तत्तन्नायकानां नामशेषतां गतत्वात्।

अर्वाचीनमहाकाव्येषु रसविषयकं किञ्चिद्वैलक्षण्यमपि दृष्टिपथमायाति। तथाहि प्राचीनकविकर्मसु कवेः प्रतिभा सहृदयचित्तवृत्तिर्वा रसोपस्थापने रसास्वादने च यथा यत्नवती, न तथा साम्प्रतिककविकृतौ दरीदृश्यते। वस्तुतः, महाकाव्येष्वर्वाचीनेष्वाधुनिकदेशसमाजगतानां प्रश्नानामुपस्थापनं बाहुल्येनालोक्यत इति कृत्वा केषुचिद्रसस्य सर्वस्वायमानत्वं न संलक्ष्यते। तथापि कविवर्णितं सर्वमेव प्रत्यक्षविधया परोक्षविधया वा रसपर्यवसायीति काव्यमीमांसाकृतां राद्धान्तः। तथाहि पण्डितराजेन जगन्नाथेनोक्तं---'अर्थमात्रस्य विभावानुभावव्यभिचार्यन्यतमत्वात्' इति। अद्यतनकालस्य महाकाव्येषु न तु शृङ्गाररसस्य परं वीररसस्याङ्गित्वमेवातिशयमालोक्यते।

महाकाव्ये कति सर्गा स्युः इत्यस्मिन् प्रसङ्गे ईशानसंहितायामुक्तं---'अष्टसर्गान् न तु न्यूनं त्रिंशत्सर्गाच्च नाधिकम्' इति। अर्थात् महाकाव्ये विद्यमानानां सर्गाणां संख्या अष्टाभ्यो न न्यूना त्रिंशद्भ्यश्चाधिका न भवेत्। किन्तु अर्वाचीनकालस्य महाकाव्येषु सर्गसंख्यागतं वैशिष्ट्यमव्यभिचरिततया नानुश्रियते। अपि च, सर्गबन्धात्मकं वैशिष्ट्यमप्यनुसृतं सदपि केषुचित् स्थलेषु प्राचीनधारां नानुसरति पूर्णतया। तथाहि भारतीयस्वातन्त्र्योदयमहाकाव्यं पर्वभिः, नारायणस्वामिचरितमलंकारैः, रक्ताक्तहिमालयं शिखरैः, गान्धिगाथामहाकाव्यञ्च भागैर्विभक्तं वर्तते। भारतीयस्वातन्त्रयोदये षट् सर्गाः श्रीभाक्तसिंहचरिते सप्त सर्गाः

क्षमारावरचिते स्वराज्यविजये चतुःपञ्चाशत्सर्गाः वर्णेकरविरचिते शिवराज्योदये अष्टाधिकषष्टिसंख्यकाः सर्गाः सन्तीति कृत्वा सर्गसंख्यागतनियमा नात्र परिपालिताः।

**जीवनीमूलककाव्यम्**

संस्कृतस्य सर्वप्रथमं जीवनीमूलकं काव्यं तावद् वाणभट्टरचितं 'हर्षचरितमिति' महाकाव्यम्। परमर्वाचीनकाले वासुदेवशर्मणा शाहुराजारामस्य जीवनमुपरि 'शाहुचरितमिति' विरचितम्। क्षमारावमहोदया स्वपितृजीवनमाधारीकृत्य जीवनीमूलकं 'शङ्करजीवनाख्यानम्' इति काव्यं विरचितवती। ऋषेररविन्दस्य उत्साहमूलकं जीवनं, कर्माणि, नीत्युपदेशान् चाधारीकृत्य सप्तदशाध्यायैः प्रविभक्तमात्मजीवनं यज्ञेश्वरशास्त्रिणालिखितम्। अष्टसर्गसम्पूर्ण 'पूर्वसाभारकारचरितं' नरेन्द्रपतापसिंहेन लिखित्वा प्रभूतं यशोऽर्जितम्। वङ्गीयेन सीतानाथेन गौरीनाथस्य जीवनमाश्रित्य 'गौरीनाथचरितमिति' जीवनीमूलककाव्यं व्यरचि।

एतदेव स्वीकरणीयं यद्वैदेशिकसाहित्येन सह गहनपरिचयवशादर्वाचीनसंस्कृतसाहित्यमुत्तराधुनिकतायगमाप्नोतीति। अतः, साम्प्रतिकः संस्कृतकविर्न हि विषयदरिद्रः, शब्दार्थदीनः, कल्पनाविहीनो वा। स प्राचीनाद्यतनभाविविषयेषु काव्यप्रणयने रमते, न च विरमति संस्कृतकाव्यामृतस्वादलुब्धसुधियां मनोरञ्जनात् प्रत्येकमर्वाचीनसंस्कृतकाव्य-प्रकारेष्वाधुनिकताभरणादिवल्लसति। परिशेषे वक्तुमलं यत्संस्कृतकाव्यविरचनप्रवृत्तिः सततं स्पन्दनशीलां तथा नवनवोन्मेषशालिनीमेष्यतीति ममाशयः।